| छन्दसां वृत्तिनामानि । | छन्दसां लक्षणगणाः । | छन्दसामुदाहरणानि । |
|---|---|---|
| हारिणी<br>अस्याश्चतुर्थे षष्ठे सप्तमे च यतिः । | वेदर्त्तुस्वैर्मभनमयला गश्चेत्तदा हारिणी<br>ऽऽऽ,ऽ।।,।।।,ऽऽऽ,।ऽऽ,।,ऽ | यस्या नित्ये श्रुतिकुवलये श्रीशालिनी लोचने<br>रागः स्वीयोऽधरकिसलये लाचारसारञ्जनम् ।<br>गौरी कान्तिः प्रकृतिरुचिरा रम्याङ्गरागच्छटा<br>सा कंसारेरजनि न कथं राधा मनोहारिणी ॥ |
| भाराक्रान्ता<br>चतुर्थे षष्ठे सप्तमे च यतिः । | भाराक्रान्ता मभनरसला गुरुः श्रुतिषड्हयैः<br>ऽऽऽ,ऽ।।,।।।,ऽ।ऽ,।।ऽ,।,ऽ | भाराक्रान्ता मम तनुरियं गिरीन्द्रविधारणात्<br>कम्पं धत्ते श्रमजलकणं तथा परिस्रवति ।<br>इत्याहृष्यन् जयति जलदस्वनाकुलवल्लवी-<br>संश्लेषोत्थं स्मरविलसितं विलोक्य गुरुं हरिः ॥ |
| हरिः | रसयुगहययुङ् नौ म्रौ सो लगौ हि यदा हरिः<br>।।।,।।।,ऽऽऽ,ऽ।ऽ,।।ऽ,।,ऽ | |
| कान्ता | भवेत् कान्ता युगरसहयैर्यभौ नरसा लगौ<br>।ऽऽ,ऽ।।.।।।,ऽ।ऽ,।।ऽ,।,ऽ | |
| चित्रलेखा<br>दशमे सप्तमे च यतिः । | ससजा भजगा ग दिक्स्वरैर्भवति चित्रलेखा<br>।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ | |
| अतिशायिनी | ससजैरतिशायिनी मता भजयरैर्गुरुभ्याम्<br>।।ऽ,।।ऽ,।ऽ।,ऽ।।,।ऽ।,ऽ,ऽ | |
| पञ्चचामरम् | अवेहि पञ्चचामरं जरौ जरौ जगौ लघुश्च<br>।ऽ।,ऽ।ऽ,।ऽ।,ऽ।ऽ,।ऽ।,ऽ,। | |
| अष्टादशाक्षरा वृत्तिः । धृतिः । | | |
| कुसुमितलतावेल्लिता<br>पञ्चमे षष्ठे सप्तमे च यतिः । | स्याद्भूतर्त्त्वश्वैः कुसुमितलतावेल्लिता म्तौ नयौ यौ<br>ऽऽऽ,ऽऽ।,।।।,।ऽऽ,।ऽऽ,।ऽऽ | क्रीड़त्कालिन्दीललितलहरीवारिभिर्दीर्घिकालै-<br>र्वातैः खेलद्भिः कुसुमितलता वेल्लिता मन्दमन्दम् ।<br>भृङ्गालीगीतैः किसलयकरोल्लासितोल्लास्यलक्ष्मीं<br>तन्वाना चेतो रभसतरलं चक्रपाणेश्चकार ॥ |
| नन्दनम्<br>एकादशे सप्तमे च यतिः । इद-<br>मेव वेदरेफैश्छिन्ना महामालिका<br>नराधिकदशभिस्तारका दशवसु-<br>भिर्लंघा इति कुत्रापि । | नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्दनम्<br>।।।,।ऽ।,ऽ।।,।ऽ।,ऽ।ऽ,ऽ।ऽ | तरणिसुतातरङ्गपवनैः सलीलमान्दोलितं<br>मधुरिपुपादपङ्कजरजःसुपूतपृथ्वीतलम् ।<br>सुरहरचित्रचेष्टितकलाकलापसंस्मारकं<br>चितितलनन्दनं व्रज सखे ! सुखाय वृन्दावनम् ॥ |
| नाराचम् | इह ननरचतुष्कसृष्टेन्तु नाराचमाचक्षते<br>।।।,।।।,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ,ऽ।ऽ | दिनकरतनयातटीकानने चारुसञ्चारिणी<br>श्रवणनिकटकृष्टमैत्रीच्छटा सखि ! राधा त्वयि ।<br>ननु विकिरति नेत्रनाराचमेषातिहृच्छेदनं<br>तदिह मदनविभ्रमोद्भ्रान्तचित्तावधत्स्व द्रुतम् ॥ |
| चित्रलेखा<br>चन्द्रलेखा इति कश्चित् । | मन्दाक्रान्ता नयरलघुयुता कीर्त्तिता चित्रलेखा<br>ऽऽऽ,ऽ।।,।।।,।,ऽऽ।,ऽऽ।,ऽ,ऽ | शश्वत्सुश्मिन् जगति मृगदृशां साररूपं यदासी-<br>दाकृष्येदं व्रजयुवतिसभा वेधसा सा व्यधायि ।<br>नैतादृक् चेत् कथमुदधिसुतामन्तरेणाच्युतस्य<br>प्रीतं तस्यां नयनयुगमभूच्चित्रलेखाङ्कितायाम् ॥ |
| शार्दूलललितम्<br>द्वादशे चरणान्ते च यतिः । | मः सो जः सतसा दिनेशऋतुभिः शार्दूलललि-<br>तम्<br>ऽऽऽ,।।ऽ,।ऽ।,।।ऽ,ऽऽ।,।।ऽ | ज्ञात्वा कंसमृगे पराक्रमविधिं शार्दूलललितं<br>यश्चक्रे चितिभारकारिषु सुरारातिष्वतिदरम् ।<br>सन्तोषं परमन्तु देवनिवहे त्रैलोक्यशरणं<br>श्रेयो वः स तनोत्वपारमहिमा लक्ष्मीप्रियतमः ॥ |
| हरिणप्लुतम्<br>हरिणप्लुतेति कुत्रापि । | मात् सो जौ भरसंयुतौ करिवाणखैर्हरिणप्लुतम्<br>ऽऽऽ,।।ऽ,।ऽ।,।ऽ।,ऽ।।,ऽ।ऽ | |
| अश्वगतिः | पञ्चभकारयुताश्वगतिर्यदि चान्त्यसरचिता<br>ऽ।।,ऽ।।,ऽ।।,ऽ।।,ऽ।।,।।ऽ | |
| सुधा | सुधा तर्कैस्तर्कैर्भवति ऋतुभिर्यो मो नसतसाः<br>।ऽऽ,ऽऽऽ,।।।,।।ऽ,ऽऽ।,।।ऽ | |
| चित्रलेखा | वर्णाश्वैर्मनगतसमकैः कीर्त्तिता चित्रलेखेयम्<br>ऽऽऽ,।।।,।।।,ऽऽ।,ऽऽ।,ऽऽऽ, | |